International Journal of Sanskrit Research 2021; 7(1): 540-543

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 540-543
© 2021 IJSR
www.anantaajournal.com
Received: 18-01-2021
Accepted: 22-02-2021

**सूर्यवंश झाः**
गवेषक, स्नातकोत्तर व्याकरण विभाग, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**सूर्यवंश झाः**
गवेषक, स्नातकोत्तर व्याकरण विभाग, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# शक्तिग्रहसाधनानि तत्र कोषस्य वैशिष्ट्यम्

## सूर्यवंश झाः

**प्रस्तावना**

कस्य शब्दस्य कस्मिन्नर्थे शक्तिः? इति जिज्ञासायाः समाधानाय अभियुक्तोक्तिरियमतीव प्रसिद्धाः–

शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

अस्यायमाशयः लौकिक शास्त्रीयोभयविधशब्दानामर्थबोधे अपेक्षितस्य शक्तिग्रहस्य व्याकरणम्, उपमानम्, कोषः, आप्तवाक्यं व्यवहारो, वाक्यशेष विकृतिः विवरणम् सिद्धपदस्य सान्निध्यं चेति अष्टविधकारणानि भवन्ति। तेषु लोक व्यवहारः मुख्य साधनः अन्येतु गौण साधनः एतदर्थं सर्वप्रथमं लोकव्यवहारस्यैव विचारः क्रियते।

1. **लोकव्यवहारः** बालकस्य सर्वप्रथमं ज्ञानं लोकव्यवहारेण वृद्धव्यवहारेण वा भवतीति, तद्यथा - एकः वृद्धपुरुषः स्वकनिष्ठं आज्ञापयति यत् गामानय, तदा सः गामानयति, तं दृष्ट्वा समीपस्थः बालकः एवं जानाति यत् सास्नादियुक्त पशुविशेषानयनं वाक्यार्थो भवति, ततः परम् यदि "गां बधान्" एवम् "अश्वमानय" इत्यादेशो भवति, तदा गोबन्धनम्। अश्वानयनं च दृष्टवा अवापेन, तथा उद्वापेन शब्द विशेषस्यार्थ विशेषः ज्ञायते वृद्धव्यवहारेण।

2. **व्याकरणम्:** संस्कृतवाङ्मये कृत्तद्धितसमासैकसनाद्यन्त धातुरूपाणां पञ्चानां वृतीनां विस्तृतैः सूत्रैः शब्दानामर्थबोधनाय व्याकरणशास्त्र–मतीवोपयुज्यते। व्याकरण शास्त्रेणैव पाचकः इत्यस्य पाककर्ता इत्यर्थस्य पिपठिषतीत्यस्य पठितुमिच्छति इत्यर्थस्य ज्ञानं भवति। एवमेव दाशरथिः इत्यस्य दशरथस्यापत्यं पुमानित्यर्थ बोधोजायते।

3. **उपमानम्:** यस्य शब्दस्यार्थोऽज्ञातो भवति, तस्यार्थस्य ज्ञानं सादृश्येनापि भवति, यथा गोशब्दस्य ज्ञाने सति गवयशब्दस्य कोऽर्थो भवतीति जिज्ञासायां गौरिवगवयः इति कथनेन गवयशब्दस्यापि अर्थज्ञानं सुलभं वा ज्ञानं न भवति तथापि अप्रत्यक्षवस्तुबोधोपमानेन सामान्यरूपेण भवति।

4. **कोषः** शब्दस्यार्थज्ञानाय कोषग्रन्थस्यावश्यकता भवति, कोषग्रन्थे शब्दस्य योऽर्थः दृश्यते सैवार्थः तत् शब्दस्य ज्ञानं भवतीत्यनुभूयते। कोषग्रन्थः शब्दस्य विभिन्न पर्याय रूपेण तस्यार्थं स्पष्टं करोति।

कोषग्रन्थे शब्दार्थानां संग्रहो भवति, तथा च एकशब्दस्य अनेकेषामर्थानां ज्ञानं तत्र दृश्यते।

**5. आप्तवाक्यम्:** आप्तोनामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवानिति। रागादिवशादपि नान्यथावादी यः स इति चरके पतञ्जलिः। सामान्यतया आप्तशब्दस्यार्थो भवति विश्वासयोग्यः। बालकः मातापितरौ निर्देशानुसारेण अर्थस्य सत्यं स्वीकरोति। अर्थज्ञाने आप्तवचनं महत्त्वपूर्ण साधनं भवति। बाल्यावस्थातः बृद्धावस्थापर्यन्तं आप्तवचनं स्वीकृत्यार्थज्ञानं करोति।

**6. वाक्यशेषः (प्रकरणम्):** येषु स्थलेषु यत्र कोऽपिशब्दः नानार्थको भवति तत्रवाक्यशेषात् अर्थात् प्रकरणद्वारा तस्य शब्दस्याअर्थ विशेषस्य संप्रत्ययो भवति। यथा-भव शब्दस्य प्रयोगः मलेच्छजातिव्यक्तेः कंगुनी नाम्नाधान्यार्थं करोति एवं आर्य जनाः यवार्थम्। अतएव यदा कथ्यते, "यवमयश्चरुर्भवति" तदा संदेहो भवति, कोऽर्थः गृह्यते। किन्तु वाक्यशेषेण ज्ञानं भवति यव इत्यस्यर्थो दीर्घशूकोयव इति।

**7. विवरणम्:** यत्र शब्दस्यार्थस्य संप्रत्ययो न भवति तत्र विवरणेनार्थज्ञानं भवति, यथा "पचति" इत्यस्यार्थबोधाय पाकं करोति इत्येव विवरणेन। एवमेव विवरणेन गोशब्दस्य सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति, विवरणेन शब्दस्य यथार्थ ज्ञानं भवति।

**8. ज्ञातपदस्य साहचर्यम्:** ज्ञातपदस्य साहचर्येणापि शब्दस्यार्थज्ञानं भवति, यथा "इह सहकारतरौ मधुरं पिको रौति" अस्मिन्वाक्ये अन्यशब्दस्यज्ञानं यदि चेत् तदा पिक शब्दस्यार्थ अन्यज्ञात शब्दस्य साहचर्येण कोकिलः पक्षिविशेष इति सम्प्रत्ययो भवति।
एवं हि शक्तिग्रहस्याष्टविध साधनानि सन्ति, तत्र अमरकोषस्य हि सर्वातिशायि महत्त्वं वर्तते। यतोहि कोषग्रन्थः शब्दस्य विभिन्न पर्यायरूपेण तस्यार्थं स्पष्टं करोति, एवं कोषग्रन्थे शब्दार्थानां संग्रहो दृश्यते।
कोषस्यवैशिष्टयम्– 'कुष्यति निष्क्रामत्यस्मात् स्वयमेव कोषः' निष्कर्षार्थे विद्यमानेन कुष् धातुना भावार्थे घञ्प्रत्ययविधानेन कोषशब्दो निष्पन्नतां याति। कोषपदं सङ्केतग्रहसाधनेषु व्यवहाराप्तवाक्योपमानवाक्यशेषविवृति-प्रसिद्धपदसान्निध्यव्याकरणकोषेषु विवक्षितमस्ति। शब्दार्थाः कोषगृहस्य सम्पद्रूपेण विलसन्ति। कोषशब्दस्य नैर्वचनिकार्थेऽर्थविज्ञानस्य दिशोऽभिज्ञायन्ते।
जिज्ञासवे एव केवलं कोषस्योपादेयत्वं वर्त्तते। यथा कूपात् पिपासुरेव पानीयं निष्कृष्यति, जिज्ञासुरेव कोषात् पदार्थं विजानाति नान्यः। अकारादिक्रमेण विन्यस्तशब्दकोषात् सामान्यजिज्ञासुः स्वकार्यं साधयति परमनुसन्धित्सवः साहित्यकाराश्च पर्यायकोषादेव समस्यां समादधति। आवश्यकता आविष्कारं जनयति, शतप्रतिशतमनुभवगम्यमिदम्। साहित्यसमृद्ध्या विलसन्त्यो भाषाः समाजस्यवर्गविशेषं पूर्वजानां भव्याभव्यकर्माणि ज्ञातुं प्रेरयन्ति। शब्दार्थानां तत्सम्बद्धविषयाणां चावबोधने सामर्थ्य-प्रदानं कोषस्योपादेयत्वं प्रकाशयति। पदशक्तिग्रहे कोषस्य प्राधान्यमज्ञैरल्पज्ञैर्विशेषज्ञैरपि स्वीक्रियते। व्याकरणं व्याख्याति यौगिकान् योगरूढांश्च शब्दान्। उपमानदिष्वपि स्वतः शक्तिग्राहकत्वं नोपपद्यते। प्रयोगप्राचुर्येण शब्दाः रूढार्थ श्लिष्यन्ति। यत्र शास्त्रकाराणां प्रकृति-प्रत्यययोः कल्पितावयवानामर्थस्य प्रतीतिर्नभवति, यस्याश्च प्रकृतिप्रत्ययसमुदायमात्रे बोध्यता निवसति सा शक्तिरेव रुढिरित्यभिधानेन व्यवह्रियते। मणिनूपुरादिरूढशब्देषु धातुप्रत्ययानामर्थो नास्तिप्रवृत्तिनिमित्तः। वाक्यपदीयटीकाकारस्य हेलाराजस्य मते रूढिशब्देष्ववयवार्थज्ञानं न भवति यद्यपि प्रवृत्तिनिमित्तान्तरङ्गक्रिया तत्रास्तित्त्वं वहति। तामनादृत्य रूढिशब्दाः पदवाच्यद्रव्यतुल्यतां वहन्ति।[1] शब्दस्य कस्मिन्नपि एकस्मिन्नर्थे यत्र सार्थकविभाजनं न भवेत् तदस्ति रूढशब्दः। जलं फलं धनं प्रभृतिशब्दा रूढाः सन्ति। यौगिकशब्दाः शब्दद्वयेनाथवा सार्थकलघुत्तमभाषिकैकिकेन निर्मिता विद्यन्ते। अर्थविशेषे सङ्कुचिताः शब्दाः योगरूढा भवन्ति यथा कुशलपङ्कजप्रवीणादयः। पङ्के जलेषु वनस्पतिषुवा पङ्कजशब्दार्थो न विभाव्यते। लघुत्तमैकिकदृष्ट्या रूढ एव शब्दो भवति। शिष्टं द्वयं प्रयोगतः सन्तोऽपि शब्दा लघुत्तमैकिकाभावे यौगिकाः सन्ति। एवं रूढिशब्दार्थज्ञानाय विज्ञाः कोषस्य महतीमावश्यकतामनुभवन्ति।
रूढिशब्दाः कथं निर्वचनीया भवन्ति, निरुक्तकारो ब्रूते 'दमूना क्षेत्रसाधा इति'। दम उपशमे (दि०प०) तत्र भाषायां दाम्यति। अनड्वान् दमयति अनड्वाहं नस्योतं करोति। दान्तोऽनड्वान्, छन्दसि पुनर्दमूना अग्निरुच्यते। स भषा-सामान्येन येनकेनचित् निर्वक्तव्यो दममना इत्येवमादिना। सर्वधातुभ्योऽसुन्[2] असुनि साधा इति मित्रं न क्षेत्रसाधसम् निरुक्त[3]।
देशप्रसिद्ध्या शब्दरूढिर्निर्णीयते। अथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु[4]। शवतिगतिकर्मा कम्बोजेष्वेव भाष्यते। शवधातुगतिकर्मा इक्शितपौ धातुनिर्देशे[5] कम्बोजदेशविशेषे तद्देशभवेषु म्लेच्छेषु प्रकृत्या भाष्यते। आख्याते पदभावेन प्रयुज्यते। शवतीति। कम्बोजाः कम्बलभोजाः पृषोदरादि[6] ते हि प्रायेण कम्बलमुपयुञ्जते हिमप्रधानत्वात्। कमनीयभोजा वा कमनीयानि प्रार्थनीयानि द्रव्याणि उपयुञ्जन्ति इति कर्मण्यण्[7] प्रचुररत्नो हि स देशः कम्बलः कमनीयो भवति शीतार्तैरित्युपयुज्येत।

अन्यत्रकोषाः कुत्रापेक्ष्यन्ते इति विचारे कोषस्य व्यावहारिकं महत्त्व प्रकटीभवति। तस्य स्वरूपानुसन्धानं क्रियते।

जीवनयात्रायामपि कोषा अपेक्ष्यन्ते। लिपेर्विकासेन समं व्यापारिकैः सांस्कृतिककारणैश्च यदा भिन्न भाषाभाषिणो मिथः सम्पर्के समायान्ति तदपि कोषा निर्मीयन्ते। गार्हस्थ्ये यथा वित्तमहत्त्वमनुभूयते सांस्कृतिकग्रन्थाध्येतृभ्यः तत्स्थानं कोषो वहति। श्री नन्दलालवर्मा विश्वलोचनकोषभूमिकायाम् कोषमहत्त्वमित्थं प्रतिपादयति- "कोषश्चैव महीपानां कोषाश्चविदुषामपि उपयोगो महानेव क्लेशस्तेन विना भवेत्" उपर्युक्तस्य सारमिदमस्ति यत् विपुलं वाङ्मयं यदोपवृंहते, शिक्षाविदां शिक्षकाणां शिक्षार्थिनां च कस्यापि जिज्ञासोर्वा कृते विरच्यतेऽयं कोषः। साहित्यसम्पन्नभाषाः कोषनिर्माणेऽनिवार्यभूमिकां निर्वहन्ति। कोषकाराणां महती परम्परा दूरादूरमनुधावती निजबौद्धिक चमत्कृतिं प्रदर्शयती विद्वन्मनोभिः सह संक्रीडते परं सांस्कृतिकाध्ययनार्हा, केनापि वैलक्षण्येन भारते विदेशेष्वपि च ख्यातिं गता, या शताब्दीनां व्यवधानेनापि जीवति अज्ञातजन्मादिपरिचयस्यामरसिंहस्य स्पृहणीया कृतिरस्ति अमरकोषेति नाम्नी।

अमरकोषस्य पूर्वजाः– व्याडिभागुरिधन्वन्तरिवररुचिप्रभृतय आसन्। कोषटीकाकार-स्सर्वानन्दोऽमरसिंहं तेषां तन्त्रसाहाय्येन स्वकृतिं घटितां विलोकयति। पुरुषोत्तदेवमहेश्वरहेमचन्द्राः अमरकोषे कात्यायनवाचस्पत्ययोः स्वोपज्ञटीकायां रचनोपयोगमन्विष्यन्ति। हेमचन्द्रोऽभिधानचिन्तामणेः व्याडिकृतकोषात् यदुद्धरति तस्मात्तस्य विपुलकायत्वं संसूच्यते। किरणप्रकरणे व्याडिना विज्ञापितं यद् रविमयूखाः विभिन्नर्तुषु कथं हीयन्ते वर्धन्ते च। कति चन्द्रमसो रथाः कथमप्सरसां समुद्भवः। बौद्धधर्मस्य कतिपयतत्त्वान्यपि तत्र शक्यते यदमरसिंहेन व्याडि-कृत प्रकाशितान्यासन्। एतेनानुमातुं कोषविधिरप्यनुसृतः स्यात्।

भागुरिकोषकारस्य त्रिकाण्डकोषोऽमरकोषात् सर्वथाभिन्नएवाभूत्। मालाकारः क्षीरस्वामिहेमचन्द्राभ्यां बहुवारं स्मृतः परं मालालेखकोऽमरदत्तोऽमरकोषकारात् अमरसिंहात् सर्वथाभिन्नो हलायुधेन प्रामाणिक इति मत्त्वा स्मृतः। वाचस्पतेः कृतिरेकार्थकशब्दानां सुभण्डारः हेमचन्द्रेणाभिधानचिन्तामणेष्टीकाया सुविचारितकतिपयशब्दाक्षरविन्यासः, आमुखे प्रमाणत्वेन धन्वन्तरिरमरसिंहस्य चिन्तितश्शब्दार्णवकोषस्तदा लब्धसत्ताकोऽवर्त्तत। पूर्ववर्त्तिकोषकारो वनस्पतिवर्गेण सम्बन्धं निघण्टुं रचयामास। सर्वकोषकृतां प्रादुर्भावः कुत्र कदा ज्ञायते। चाभवन्नेदं स्वरूपतोऽमरकोषो व्याडिवररूचिभागुरिधन्वन्तरीणां संक्षेपोऽस्तीति एच०पी० शास्त्री मनुते। क्षीरस्वामिकृटीकायाः संस्कर्त्ता के ओका कात्यायनं मालाकारं च एवं केशवो निजकल्पद्रुकोषे वाचस्पतिमपिअमरसिंहस्य पूर्ववर्त्तिनं मन्यते। कोलब्रुकमहोदयो रभसमरमरकोशस्य स्रोतः स्वीकरोति परं रामावतारशर्मा रभसमेवामरसिंहस्यानुयायिनम-भ्युपगच्छति।

अमरकोषस्य पूरककोषा अपि विद्वत्समाजे स्वीक्रियन्ते। बौद्धधर्मानुयायिन स्त्रिकाण्डशेषोऽमरकोषस्य पूरक आसीदिति कथ्यते। पुरुषोत्तमदेवस्तस्य संग्रहीता आसीत्। अमरकोषे बुद्धानां सप्तदशनामानि विन्यस्तानि सन्ति, त्रिकाण्डशेषे तानि सप्तत्रिंशानि कृतानि। अमरकोषे गौतमबुद्धस्य सप्तनामसु त्रीण्यन्यानि तेन वर्धितानि। अग्निपुराणां कोषसङ्कलनेऽमरकोशस्य परिवर्त्तितं रूपं प्रस्तौति वर्गविभाजने किंचिदन्तरेण सह।

अग्निपुराणस्य शब्दकोषे वर्गयोजनैवं वर्गयोजनैवं वरिवर्ति-स्वर्गपातालादिवर्गः, अव्ययवर्गः, नामार्थवर्गः, भूमिवनौषध्यादिवर्गः, ब्रह्मक्षत्रविट्शूद्रादि वर्गः, सामान्यनामलिङ्गानि च षड्विभागे विन्यस्तानि सन्ति। शाश्वतस्यानेकार्थसमुच्चयोऽष्टाशतपदपरिमितः, पदसन्तुलने किञ्चिदवरो भाति। क्षीरस्वामी शाश्वतममरसिंहानुयायिनं स्वीकुरुते सप्रमाणम्। केचानान्ये शाश्वतममरसिंहस्य पूर्ववर्त्तिनं स्थापयन्ति। नेदं सत्यम्। भट्टहलायुधोऽभिधानरत्नमालायां विभिन्नछन्दःसु नवशतपद्यानि स्वर्भूमिपाताल- सामान्यानेकार्थकाण्डेषु विभनक्ति। अमरदत्तवररुचिभागुरिवोपालितान् प्रामाणिकान् मन्यते। विश्वलोचनकारस्य कथनमस्ति यत् अमरसिंहनिर्मिते टैपिस्ट्रीतिख्याते वस्त्रे स मौक्तिकानि टङ्कयति। भागुरिकात्यहलायुधामर-शाश्वतधन्वन्तरीन् मङ्खोऽनेकार्थकोषरचनायां अनुसरति। तस्य शब्दविभाजनमन्तिमव्यञ्जनाधृतं वर्त्तते।

अमरकोषपरवर्त्तिनः कोषाः अमरकोषादनन्तरं कोषस्य विविधपद्धतयः प्राचलिषुः– नानार्थकोषपद्धतिः सामानार्था अंशतः पर्यायवाचिपद्धतयश्चेत्यादयः। शाश्वतस्यानेकार्थसमुच्चयः (सप्तमशाताब्द्याम्) वैजयन्तीकोषो वृद्धाकारः प्रामाणिकश्चापि सन्, अत्र पर्यायवाचिनो नानार्थका अकारादिक्रमश्च त्रयोविधयः संयुज्यन्ते। द्वादशशताब्द्यां मुङ्खकोऽमरकोषमाधृत्यानेकार्थकोषं व्यरचयत्। अजयपालः (द्वादशत्रयोदशशताब्द्याः मध्येभवः) 1007 श्लोकपरिमितं नानार्थसङ्ग्रहं व्यचिनोत्। द्वादशशताब्द्या उत्तरार्धे धनञ्जयो नाममालाम् केशवस्वामी नानार्थार्णवसंक्षेपं शब्दकल्पद्रुमं च निरमिमात। मेदिनी (चतुर्दश शताब्द्याम्) नानार्थशब्दकोषसङ्ग्रहेण प्रासिद्धयत्। अमरकोषात् प्रभावितः प्रतीयते। द्वादशशताब्द्यामेव जिनप्रभरसूरेरपवर्गनाममाला, पञ्चखण्डेषु विभाजिता, शब्दरत्नप्रदीपः कल्याणमल्लहतकृतश्चतुर्दशशताब्द्यां प्रकाशितः।

एवमनेकेकोषाः अनेकार्थनानार्थमञ्जरी, रूपमञ्जरी, महीपस्यानेकार्थमाला, विश्वनाथस्य कोषकल्पतरुः, सुजनस्य नानार्थपदपीठिका, शब्दलिङ्गार्थचन्द्रिका, हरिचरणसेनस्य पर्यायमुक्तावली राघवखाण्डेकरस्य कोषावतंसः, हर्षस्यलिङ्गानुशासनम्, शिवदत्तवैद्यस्य शिवकोषः, लक्षणकोशश्च भुवनेशस्य लौकिकन्यायमुक्तावली लौकिकन्यायकोषो लौकिकन्यायसङ्ग्रहश्च सर्वे कोषपरम्परां निजयोगदानेन परिपुष्णन्ति।

आधुनिककोषेषु शब्दकल्पद्रुमः वाचस्पत्यम् च महतीषूपलब्धिष्वन्यतमे मन्येते। पाणिनिव्याकरणानुसारं प्रतिशब्दोऽत्र निरुक्तः, शब्दप्रयोगा अपि वर्त्तन्ते। एतस्यां सूच्यामन्येऽपि बहवः कोषा वर्धयितुं शक्यन्ते। संस्कृतकोषपरम्परा मुखरयति यत्संस्कृतभाषायाः कियद्वपुलं शास्त्रीयं वैज्ञानिकं दार्शनिकं ललितसाहित्यं च समृद्धचिन्तनं ग्रन्थाकरं सम्भावितं स्यात्। आक्रमणकारिणो बाह्यत आगत्यैतद्देशसम्पदं लुण्ष्यामासुरग्नौ चिक्षिपुश्च। वैदिकं लौकिकं च साहित्यं तन्निहितार्थबोधाय कोषापेक्षिणः स्युः, सहजकल्पनागम्यमिदम्।

## संदर्भः


1. वाक्यपदीयम्, हेलाराजटीका
2. अष्टाध्यायी-3.1.88।
3. ऋग्वेद-6.2.4।
4. निरुक्तभाष्ये-2.1.3।
5. अष्टाध्यायी-3.3.108 वार्त्तिके।
6. अष्टाध्यायी-6.3.109।
7. अष्टाध्यायी-3.2.1।